स्मृतः । भौमस्थानेऽधिकहक्तौ ग्रहारो वा न्टपाद्भयम् । आरे खस्थे चतुष्पाद्भ्यः पातोदुःखरुजोऽसृजः । वित्ताष्टगेज्यो धनहा यद्यवद्देशः शुभेक्षितः । मन्दे द्यूने दुर्वचनापवादकलिभर्त्सनम् । पतिते त्वे क्रूरदृशाऽऽरेत्यशाले क्षतिं वदेत् । कुजहद्दास्थिते नाशः सौम्यदृष्ट्या शुभं वदेत् । यत्तर्क्षे जन्मनि कुजः सोऽब्दलग्नपमोयदा । लग्नाधिपोनष्टदृग्धोयोषिद्वादाः शुभान्विते । जन्मन्यष्टमगे जीवे साधिव्याधिकलिः पृथुः । जयः शुक्रे त्वणादुक्तप्रत्युत्तरवशेन तु । भौमेऽन्त्यगे धने सूर्य्ये वादक्लेशं विनिर्द्दिशेत् । रिपुगौत्वकलिभीतिः संख्ये कुजहतेऽन्धे । दृष्ट्वोजन्माङ्गपोवर्षेऽष्टमोरोगकलौ दिशेत् । सूत्यब्दयोरधिकतो भौमस्थाने गुरुर्हतः । पापैर्वादः स्फुटोऽप्येवं तादृशीन्दौ शनेः पदे । सूत्यब्दयोरधिकते चन्द्रे बुधपदे हते । क्रूरैर्विदेशगमनं वादः स्याद्विमनस्कता । मेषे सिंहे धनुःस्थारेऽब्दपेरन्ध्रे सिते भयम् । मृतौ मृतीशलग्नेशौ मृत्युदौ पापदृग्युतौ । यत्तर्क्षे जन्मनि कुजः सोऽब्दलग्नपगोयदा । बुधोवर्षपतिर्नष्टबलस्तत्र न शोभनम् । सार्के शनौ भौमयुतेस्वाष्टस्थे वाहनाद्भयम् । सार्के भौमेऽष्टमस्थे तु पतनं वाहनाद्वदेत् । सारेऽब्दपे मृगे मृत्युश्चन्द्रेऽन्त्यारिमृतौ क्षतिः । उदिते मृतिसद्मेशे निर्बले जीविते क्षतिः । पुण्यसद्मेश्वरः पुण्यसहमादष्टमोपगः । मृत्यष्टमेशपुण्येशोमृतिदः पापदृग्युतः । मृत्यष्टमगतो राशिः पुण्यसद्मनि नाथयुक् । अब्दलग्नाष्टमर्क्षं तच्चेदित्थं स्यात्तदा क्षतिः । पुण्यभं चाशुभाक्रान्तं मृतीशोऽन्त्यारिरन्ध्रगः । मुथहेशोऽब्दपोवापि मृत्युं तत्र विनिर्द्दिशेत् । सक्रूरे जन्मपे मृत्यौ मृतिश्चेदिन्थिहाकियुक् । भौमच्युतेक्षणे तत्र मृत्युः स्यादात्मघाततः । मन्दोऽष्टमोमृतीशेत्थशालान्मृत्युकरः स्मृतः । शुभेत्थशालात् सर्वेऽपि योगाः स्युः शुभदायकाः । सूतिरन्ध्रपतिर्मन्दोऽष्टमोऽब्दलग्नपेन चेत् । इत्थशाली क्रूरदृशा तत्कालं मृत्युदायकः, नील० ता० । [अष्टमुष्टिमिते परिमाणभेदे ।

**अष्टमान** न० अष्टौ मुष्टयः परिमाणमस्य । कुड़वरूपे

**अष्टमिका** स्त्री वैद्यकोक्ते चतुस्तोलकपरिमाणे ।

**अष्टमी** स्त्री अष्टानां पूरणी । षोड़शकलात्मकचन्द्रस्य अष्टमकलाक्रियारूपायां स्वनामख्यातायां तिथौ २अष्टसंख्यापूरणयाञ्च अष्टमशब्दे उदा० । अश्+क्त अष्टं संघातं व्याप्तिं वा माति मा—क गौरा० ङीष् । कोटालतायाम् ।

**अष्टमुष्टि** पु० अष्टौ मुष्टयः परिमाणमस्य अण् "द्विगोर्लुगिति" लुक् । कुञ्चिपरिमाणे "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कल" इति हेमाद्रिदानखण्डे परिभाषायां पुरा० ।

**अष्टमूर्त्ति** पु० अष्टौ भूम्यादयो मूर्त्तयोऽस्य । "क्षितिर्जलं तथा तेजो वायुराकाशमेव च । यष्टार्कश्च तथा चन्द्रः मूर्त्तयोऽष्टौ पिनाकिनः" इत्युक्ताष्टमूर्त्तिधारिणि १शिवे । "महेश्वरेण यो राजन्नजीर्णो ह्यष्टमूर्त्तिना । कस्तमुत्सहते वीरोयुद्धे जरयितुं पुमान् । भा०व०अ० ४९ "अवेहि मां किङ्करमष्टमूर्त्तेः" रघुः । "स्वमेव मूर्त्त्यन्तरमष्टमूर्त्तिः" "जग्राह ताम्राङ्गुलिमष्टमूर्त्तिः" इति च कुमा० । क्षित्यादिमूर्त्तिभेदेन तस्य नामभेदः यथा सर्व्वः क्षितिमूर्त्तिः एवं भवोजलमूर्त्तिः रुद्रोऽग्निमूर्त्तिः । उग्रोवायुमूर्त्तिः भीम आकाशमूर्त्तिः पशुपतिर्यजमानमूर्त्तिः । महादेवः" सोममूर्त्तिः ईशान सूर्य्यमूर्त्तिः । एताएव तस्याष्टौ मूर्त्तयः शाकुन्तले वर्णिताः "या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् । यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः" । अष्टतन्वादयोऽप्यत्र । कर्म्म०संज्ञात्वान्न द्विगुः । शिवस्य क्षित्यादिषु अष्टसु २मूर्त्तिषु स्त्री ब०व० ।

**अष्टमूर्त्तिधर** पु० ६—अच् धरः अष्टानां मूर्त्तीनां धरः । शिवे "अष्टमूर्त्तिधरमूर्त्तिरष्टमी" माघः "तद्व्याख्याने अष्टानां मूर्त्तीनां समाहारः इति वदन् मल्लिनाथः "दिक्संख्ये संज्ञायामिति" सूत्रास्मरणेन भ्रान्तएव मूर्त्तीनां प्रकृते क्षित्यादिविशेष संज्ञावाचित्वात् कर्म्मधारयस्यैव तत्र प्रसक्तेः त्रिलोकनाथइत्यादिवत् उत्तरदद्विगुनैवोपपत्तौ तत्सूत्रसङ्कोचानुपपत्तेः इत्यलम् ।

**अष्टरत्नि** त्रि० अष्टौ रत्नयः जङ्घमानमस्य । बद्धमुष्टिहस्तोन्माने "अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः" भा० क०प० ७२ अध्या० ।

**अष्टलोहक** न० ब०व०कर्म्म० संज्ञात्वान्न द्विगुः । "सुवर्णं रजतं ताम्रं सीसकं कान्तिकं तथा । वङ्गं लौहं तीक्ष्णलौहं लौहान्यष्टौ इमानि तु" इत्युक्तेषु अष्टसु धातुषु ।

**अष्टवर्ग** पु० अष्टानामराङ्कव्यादीना वर्गो यत्र । ज्योतिषोक्ते रेखाविशेषेण शुभाशुभसूचके चक्रभेदे यथा । "जन्मकालग्रहस्थित्या फलं वक्ष्ये शुभाशुभम् । "स्वाहिनकृत् शुभदः क्षितिपक्षसमुद्रनगादिकपञ्चगतो १,२,४,७,८,९,१०,११, ऽथ विभावरिभर्त्तुरस्त्राङ्गदशेशगतो ३,६,१०,११, ऽथ कुजाद्रविवत्,१,२,४,७,८,९,१०,११, अथ सोमसुतात्त्रिश-